# Mrityunjaya Aradhanam

# મૃત્યુઞ્જયારાધનમ્

## Document Information

Text title : Mrityunjaya Aradhanam

File name : mRRityuMjayArAdhanam.itx

Category : shiva

Location : doc_shiva

Transliterated by : Parameshwar Puttanmane poornapathi at gmail.com

Proofread by : Parameshwar Puttanmane poornapathi at gmail.com

Latest update : September 13, 2020, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# મૃત્યુઞ્જયારાધનમ્

॥ અથ મૃત્યુઞ્જયારાધનમ્ ॥

અથ યજમાનઃ સ્નાનાદિ નિત્યકર્મ કૃત્વા, કર્માઙ્ગત્વેન સ્નાનપવન -મન્ત્રાચમનમન્ત્રપ્રોક્ષણાનિ વિધાય, ગણપતિં સમ્પૂજ્ય, ક્ષેત્રપાલવાસ્તોષ્પતિં સંપ્રાર્થ્ય, શ્રી મૃત્યુઞ્જયરુદ્રઃ પ્રીયતામિતિપુણ્યાહં વાચયિત્વા, સઙ્કુલ્પયતિ ।

અથ પ્રધાનસઙ્કુલ્પઃ ॥

મમ અતીતેષુ જન્મસુ, ઇહ જન્મનિ ચ જન્મપ્રભૃત્યેતત્ક્ષણપર્યન્તં જ્ઞાનતોઽજ્ઞાનતશ્ચ સ્વતઃ પરપ્રેરણયા વા કૃતાનાં પાપાનાં પરિહારાર્થં, આધ્યાત્મિક-આધિદૈવિક-આધિભૌતિકાખ્યતાપત્રયનિવૃત્યર્થં પરકૃતૈઃ મન્ત્રતન્ત્રયન્ત્રવિષચૂર્ણકૃત્યાઞ્જનાદ્યતર્ક તાપપ્રદૈઃ પ્રયોગૈશ્ચ જનિષ્યમાણપીડા શાન્ત્યર્થં, સ્થાવર-જઙ્ગમ-કૃત્રિમ-આકાશ-દન્ત-નખ-લૂતાદ્યુદ્ભવવિષબાધા પરિહારાર્થં, શીતાતપલોભમોહક્ષુત્પિપાસાખ્ય ષડૂર્મિબાધા નિરાસાર્થં, રાજ-ચોર-શત્રુ-શસ્ત્ર-વહ્નિ-વાયુ-વારિ-સરીસૃપ-દુષ્ટમૃગ ભયનિરસનાર્થં, વાતપિત્થશ્લેષ્મવૈષમ્યેણ ઉત્પત્સ્યમાનાનાં દુષ્ટનક્ષત્રમૃત્યુયોગ દુષ્ટતિથિપાપવારાદિષુ ચ જનિષ્યમાણાનાં, વિવિધજ્વરાણાં, દુઃસહપાપપ્રદાનાં વ્યાધીનાં, દુશ્ચિકિત્સ્યરૂપાણાં મહારોગાણાં ચ નિવૃત્તિદ્વારા નૈરુજ્યબલ પુષ્ટ્યતિશયાભિવૃદ્ધ્યર્થં, કામક્રોધાદિવશાત્ જનિષ્યમાણાનાં મનોવિકારચિત્ત ચાઞ્ચલ્યાદીનાં પરિહારપૂર્વકં મનઃશાન્તિચિત્ત સ્થૈર્યપરમસ્વાસ્થ્યલાભાર્થં, સર્વેષાં પરસ્પરનિન્દાહિંસાવિદ્વેષનિવૃત્તિપૂર્વકં સૌહાર્દ સમુત્પત્યર્થં, અપમૃત્યુકાલમૃત્યુ વ્યાલમૃત્યુઘોરમૃત્યુદુષ્ટમૃત્યુ-અરિષ્ટમૃત્યુક્ષુદ્રમૃત્યુ લક્ષણસપ્તવિધ મૃત્યુકણ્ટકાનાં નિવારણાર્થં અન્યેષાં અકાલમૃત્યુપ્રદાયકાનાં કણ્ટકાનાં પરિહારપૂર્વકં આયુરભિવૃદ્ધ્યર્થં, દુઃખભયલજ્જારોગશોકમરણ-અપમાનેત્યષ્ટવિધ મૃત્યુદોષાણાં અપનોદનાર્થં ગોભૂગૃહધનધાન્યકનકવસ્તુવાહનાદિ સકલૈશ્વર્યસિદ્ધ્યર્થં ધર્માર્થ કામમોક્ષસિદ્ધ્યર્થં શ્રીમૃત્યુઞ્જયરુદ્રપ્રીત્યર્થં મૃત્યુઞ્જયહોમાખ્યં કર્મ કરિષ્યે ॥ ઇતિ સઙ્કુલ્પ્ય, ઋત્વિજો વરયેત્ ।

અથ જપવિધાનમ્ ॥

યજમાનેન વૃતોઽહં મૃત્યુઞ્જયપ્રીત્યર્થં મૃત્યુઞ્જયમન્ત્રજપં કરિષ્યામિ ॥ તત્રાદૌ ન્યાસાઃ -

અથ ઋષ્યાદિન્યાસાઃ ॥

કહોળઋષયે નમઃ । ઇતિ શિરસિ । દેવીગાયત્રી છન્દસે નમઃ । ઇતિ મુખે । શ્રીમૃત્યુઞ્જયરુદ્રદેવતાયૈ નમઃ । ઇતિ હૃદિ । જું બીજાય નમઃ । ઇતિ નાભૌ । સઃ શક્તયે નમઃ । ઇતિ પાદયોઃ । શ્રીમૃત્યુઞ્જયરુદ્રપ્રીત્યર્થે જપે વિનિયોગાય નમઃ । ઇતિ સર્વાઙ્ગે ॥ ઇતિ ॥

અથ કરન્યાસઃ ॥

ૐ સાં અઙ્ગુષ્ટાભ્યાં નમઃ । ૐ સીં તર્જનીભ્યાં નમઃ । ૐ સૂં મધ્યમાભ્યાં નમઃ । ૐ સૈં અનામિકાભ્યાં નમઃ । ૐ સૌં કનિષ્ઠિકાભ્યાં નમઃ । ૐ સઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥ ઇતિ ॥

અથ હૃદયદિન્યાસાઃ ॥

ૐ સાં હૃદયાય નમઃ । ૐ સીં શિરસે સ્વાહા । ૐ સૂં શિખાયૈ વષટ્ । ૐ સૈં કવચાય હુમ્ । ૐ સૌં નેત્રત્રયાય વૌષટ્ । ૐ સઃ અસ્ત્રાય ફટ્ ॥ ઇતિ ॥

અથાક્ષરન્યાસઃ ॥

ૐ ૐ નમઃ । ઇતિ નાભૌ । ૐ જૂં નમઃ । ઇતિ હૃદિ । ૐ સઃ નમઃ । ઇતિ ભ્રૂમધ્યે ॥ ઇતિ ॥

અથ ધ્યાનમ્ ॥

સ્ફુટિતનલિનસંસ્થં મૌળિબદ્ધેન્દુરેખા ગલદમૃતજલાર્દ્રં ચન્દ્રવહ્ન્યર્કનેત્રમ્ । સ્વકરકલિતમુદ્રાપાશવેદાક્ષમાલં સ્ફટિકરજતમુક્તાગૌરમીશં નમામિ ॥ ઇતિ ॥

ચન્દ્રાર્કાગ્નિવિલોચનં સ્મિતમુખં પદ્મદ્વયાન્તઃ સ્થિતં,
મુદ્રાપાશમૃગાક્ષસૂત્રવિલસત્પાણિં હિમાંશુપ્રભમ્ ।
કોટીરેન્દુગલત્સુધાપ્લુતતનું હારાદિભૂષોજ્વલં,
કાન્ત્યાવિશ્વવિમોહનં પશુપતિં મૃત્યુઞ્જયં ભાવયે ॥ ઇતિ શારદા તિલકે ધ્યાનાન્તરમુક્તમ્ ॥ માનસો પચારૈઃ સમ્પૂજ્ય, મૂલં જપેત્ ॥

ૐ “ઓં જૂં સઃ” ઇતિ ॥

ૐ “વં જૂં સઃ” ઇત્યમૃતમૃત્યુઞ્જયમન્ત્રઃ ॥

ૐ જું સઃ ઇત્યનન્તરં પાલયપદયુગલયુક્તં સાધ્યનામ ચોક્ત્વાનન્તરમપિ સઃ જું ૐ ઇતિ પ્રતિલોમેન યોજયેદિતિ મન્ત્રાન્તરમુક્તં પ્રપઞ્ચસારસારસઙ્ગ્રહે,
ૐ “ઓં જૂં સઃ મૃત્યુઞ્જય પાલય પાલય સઃ જૂં ઓં” ઇત્યપિ દ્વાદશવર્ણાત્મકો મન્ત્રઃ ॥

ૐ “ઓં જૂં સઃ સઃ જૂં ઓં” ઇતિ ષડક્ષરમૃત્યુઞ્જયમન્ત્રઃ ॥

“ઓં જું સઃ” ઇત્યપિ પાઠાન્તરં વર્તતે ॥ ૐ “હૌં જૂં સઃ” ઇતિ પ્રાસાદમૃત્યુઞ્જયમન્ત્રઃ મન્ત્રમહાર્ણવે ॥

અથ ત્ર્યમ્બકમન્ત્રઃ ॥ અસ્ય શ્રીત્ર્યમ્બકમન્ત્રસ્ય, વસિષ્ઠ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । ત્ર્યમ્બકરુદ્રો દેવતા । ૐ બીજમ્ । હ્રીં શક્તિઃ ॥ ૐ ત્ર્યમ્બકમ્ । ૐ યજામહે । ૐ સુગન્ધિં પુષ્ટિવર્ધનમ્ । ૐ ઉર્વારુકમિવ બન્ધનાત્ । ૐ મૃત્યોર્મુક્ષીય । ૐ મામૃતાત્ ॥ અચ્છં સ્વચ્છારવિન્દસ્થિતમુભયકરે સંસ્થિતૌ પૂર્ણકુમ્ભૌ,
દ્વાભ્યાં વેદાક્ષમાલે નિજકરકમલાભ્યાં ઘટૌનિત્યપૂર્ણૌ ।

દ્વાભ્યાં તૌ ચ સ્રવન્તૌ શિરસિ શશિકલાં ચામૃતૈઃ પ્લાવયન્તમ્,
દેહં દેવો દધાનઃ પ્રદિશતુ વિશદાં કલ્પજાલં શ્રિયં નઃ ॥

ॐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ । ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય મામૃતાત્ ॥ ઇતિ ॥

અથ ષટ્પ્રણવમહામૃત્યુઞ્જય મન્ત્રઃ ॥ અસ્ય શ્રીમહામૃત્યુઞ્જયમન્ત્રસ્ય વસિષ્ઠ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । મહામૃત્યુઞ્જયત્ર્યમ્બકરુદ્રો દેવતા ॥ ॐ હ્રૌં જૂં સઃ । ॐ ભૂર્ભુવસ્સ્વઃ । ॐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ । ॐ ઉર્વારુકમિવ બન્ધનાત્ । ॐ મૃત્યોર્મુક્ષીય મામૃતાત્ । ॐ સ્વઃ ભુવઃ ભૂઃ સઃ જૂં હ્રૌં ઓમ્ ॥ અરુણકમલકાન્તિં
સ્વર્ધુનીરાજમાનમ્,
કરકલિતકપાલં સ્વક્ષમાલાં દધાનમ્ ।
કલશમમૃતપૂર્ણં શૂલહસ્તં જ્વલન્તમ્,
ત્રિણયનમભિવન્દે મૃત્યુમૃત્યું મહેશમ્ ॥ ॐ ઓં હ્રૌં જૂં સઃ ॐ ભૂર્ભુવસ્સ્વઃ ॐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ । ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય મામૃતાત્ ॥ ॐ સ્વઃ ભુવઃ ભૂઃ ॐ સઃ જૂં હ્રૌં ઓમ્ ॥ ઇતિ ॥

અથ પૌરાણિકો મન્ત્રઃ ॥

મૃત્યુઞ્જયાય રુદ્રાય નીલકણ્ઠાય શમ્ભવે ।
અમૃતેશાય શર્વાય મહાદેવાય તે નમઃ ॥ ઇતિ ॥

અથ કલશસ્થાપનપૂજનમ્ ॥

તત્રાદૌ યન્ત્રલેખનમ્ -
અષ્ટદલ પદ્મપત્રં વિલિખ્ય, તદ્બાહ્યે ચતુર્દ્વારં ચતુરસ્રં વા રચયેત્ ॥

બિન્દુત્રિકોણષટ્કોણવૃત્તાષ્ટદલવૃત્તત્રયભૂપુરયુતમિતિ દેવીરહસ્યે,
ષટ્કોણવૃત્તભૂપુરત્રયમિતિ મન્ત્રમહાર્ણવે,
ષટ્કોણભૂપુરમિતિ,અષ્ટદલભૂપુરત્રયમિતિ વિદ્યાર્ણવતન્ત્રે,
પઞ્ચકોણાષ્ટવૃત્તાષ્ટદલભૂપુરત્રયમિતિ મન્ત્રમહાર્ણવે,

પૂજાદ્રવ્યાણિ સઙ્ગૃહ્ય, ઘણ્ટાનાદં કૃત્વા, દેશકાલૌ સઙ્કીર્ત્ય, શ્રીમૃત્યુઞ્જયરુદ્રપ્રીત્યર્થં દેવતા સાન્નિધ્યાર્થં કલશસ્થાપન પૂજનં કરિષ્યે ॥ ઇતિ સઙ્કલ્પ્ય, પૃથિવીપૂજાદિ મણ્ટપાર્ચનાન્તે દ્વારમર્ચયેત્ ।

અથ દ્વારપાલપૂજા ॥

પૂર્વદ્વારે, ॐ નન્દિને નમઃ । ॐ મહાકાલાય નમઃ । દક્ષિણદ્વારે, ॐ ગણેશાય નમઃ । ॐ વૃષભધ્વજાય નમઃ । પશ્ચિમદ્વારે, ॐ ભૃઙ્ગરિટયે નમઃ । ॐ સ્કન્દાય નમઃ । ઉત્તરદ્વારે, ॐ પાર્વતીશાય નમઃ । ॐ ચણ્ડેશ્વરાય નમઃ ॥ ઇતિ ॥

અથ પીઠપૂજા ॥

ૐ ગું ગુરુભ્યો નમઃ । ગં ગણપતયે નમઃ । ૐ આધારશક્ત્યૈનમઃ । મૂલપ્રકૃત્યૈ નમઃ । ૐ આદિકૂર્માય નમઃ । ૐ અનન્તાય નમઃ । ૐ પૃથિવ્યૈ નમઃ । ૐ ધર્માય નમઃ । ૐ જ્ઞાનાય નમઃ । ૐ વૈરાગ્યાય નમઃ । ૐ ઐશ્વર્યાય નમઃ । ૐ અધર્માય નમઃ । ૐ અજ્ઞાનાય નમઃ । ૐ અવૈરાગ્યાય નમઃ । ૐ અનૈશ્વર્યાય નમઃ । ૐ સં સત્વાય નમઃ । ૐ રં રજસે નમઃ । ૐ તં તમસે નમઃ । મં માયાયૈ નમઃ । વિં વિદ્યાયૈ નમઃ । પં પદ્માય નમઃ ॥ અં અર્કમણ્ડલાય નમઃ । ઉં સોમમણ્ડલાય નમઃ । મં વહ્નિમણ્ડલાય નમઃ । અં આત્મને નમઃ । ઉં અન્તરાત્મને નમઃ । મં પરમાત્મને નમઃ । હ્રીં જ્ઞાનાત્મને નમઃ ॥ ઇતિ ॥

અથ નવશક્તિપૂજા ॥ ૐ વામાયૈ નમઃ । ૐ જ્યેષ્ઠાયૈ નમઃ । ૐ રૌદ્ર્યૈ નમઃ । ૐ કાલ્યૈ નમઃ । ૐ કલવિકરિણ્યૈ નમઃ । ૐ બલવિકરિણ્યૈ નમઃ । ૐ બલપ્રમથિન્યૈ નમઃ । ૐ સર્વભૂતદમન્યૈ નમઃ । ૐ મનોન્મન્યૈ નમઃ ॥ ઇતિ ॥

ૐ નમો ભગવતે સકલગુણ શક્તિયુક્તાય અનન્તાય યોગપીઠાત્મનેનમઃ ॥ સુવર્ણપીઠં કલ્પયામિ । “ઓં જૂં સઃ” ॥ ઇતિ મૂલેન મૂર્તિં પ્રકલ્પ્ય,
ૐ નમોઽસ્તુ સ્થાણુભૂતાય જ્યોતિર્લિઙ્ગાવૃતાત્મને ।
ચતુર્મૂર્તિવપુશ્છાયાભાસિતાઙ્ગાય શમ્ભવે ॥

ચન્દ્રાર્કાગ્નિવિલોચનં સ્મિતમુખં પદ્મદ્વયાન્તઃ સ્થિતં,
મુદ્રાપાશમૃગાક્ષસૂત્રવિલસત્પાણિં હિમાંશુપ્રભમ્ ।
કોટીરેન્દુગલત્સુધાપ્લુતતનું હારાદિભૂષોજ્વલં
કાન્ત્યાવિશ્વવિમોહનં પશુપતિં મૃત્યુઞ્જયં ભાવયે ॥

સ્વાત્મસંસ્થમજં શુદ્ધં ત્વામદ્ય પરમેશ્વર । અરણ્યામિવ હવ્યાશં મૂર્તા વાવાહયામ્યહમ્ ॥

“ઓં જૂં સઃ” ॥ ઇતિ મૂલમુચ્ચાર્ય, વ્યાહૃત્યા આવાહયેત્ ।
આવાહનાદિ મુદ્રાઃ પ્રદર્શ્ય, ગન્ધલિપ્તકરદ્વયેન મૂલેન ત્રિર્વ્યાપ્ય, સકુલીકૃત્ય, મૂલં યથાશક્તિ જપેત્ ॥ તતઃ પઞ્ચોપચારૈરભ્યર્ચ્ય, ષોડશોપચારાન્સમાચરેત્ ॥

અથોપચારાઃ ॥

સર્વાન્તર્યામિણે દેવ સર્વબીજમયં શુભમ્ । સ્વાત્મસ્થાય પરં શુદ્ધં આસનં કલ્પયામ્યહમ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । આસનં સમર્પયામિ ॥

યસ્ય દર્શનમિચ્છન્તિ દેવાઃ સ્વાભીષ્ટસિદ્ધયે । તસ્મૈ તે પરમેશાય સ્વાગતં સ્વાગતં ચ મે ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । સ્વાગતં સમર્પયામિ ॥

યદ્ભક્તિલેશસમ્પર્કાત્ પરમાનન્દસમ્ભવઃ । તસ્મૈ તે ચરણાબ્જાય પાદ્યં શુદ્ધાય કલ્પયે ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । પાદ્યં સમર્પયામિ ॥

તાપત્રયહરં દિવ્યં પરમાનન્દલક્ષણમ્ । તાપત્રયવિનિર્મુક્તં તવાર્ઘ્યં કલ્પયામ્યહમ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । અર્ઘ્યં સમર્પયામિ ॥

વેદાનામપિ વેદાય દેવાનાં દેવતાત્મને । આચમં કલ્પયામીશ શુદ્ધાનાં શુદ્ધિ હેતવે ॥ શ્રી મૃત્યુઞ્જય રુદ્રાય નમઃ । આચમનં સમર્પયામિ ॥

સર્વકાલુષ્ય હીનાય પરિપૂર્ણસુખાત્મકમ્ । મધુપર્કમિદં દેવ કલ્પયામિ પ્રસીદ મે ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । મધુપર્કં સમર્પયામિ ॥

પરમાનન્દબોધાબ્ધિ નિમગ્નનિજમૂર્તયે । સાઙ્ગોપાઙ્ગમિદં સ્નાનં કલ્પયામીશ તે પુનઃ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । સ્નાનં સમર્પયામિ ॥

મયા ચિત્રપટાચ્છન્નનિજગુહ્યોરુતેજસે । નિરાવરણવિજ્ઞાનવસ્ત્રં તે કલ્પયામ્યહમ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । વસ્ત્રં સમર્પયામિ ॥

યામાશ્રિત્ય મહામાયા જગત્સમ્મોહિની સદા । તસ્મૈ તે પરમેશાય કલ્પયામ્યુત્તરીયકમ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । ઉપવસ્ત્રં સમર્પયામિ ॥

યસ્ય શક્તિત્રયેણેદં સંપ્રોતમખિલં જગત્ । યજ્ઞસૂત્રાય તસ્મૈ તે યજ્ઞસૂત્રં પ્રકલ્પયે ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । યજ્ઞોપવીતં સમર્પયામિ ॥

પરમાનન્દસૌરભ્યપરિપૂર્ણદિગન્તરમ્ । ગૃહાણ પરમં ગન્ધં કૃપયા પરમેશ્વર ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । ગન્ધં સમર્પયામિ ॥

તુરીય વનસમ્ભૂતં નાનાગુણમનોહરમ્ । આનન્દસૌરભં પુષ્પં ગૃહ્યતામિદમુત્તમમ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । પુષ્પાણિ સમર્પયામિ ॥

અથાવરણ પૂજા ॥

૧) ૐ સાં હૃદયાય નમઃ । ૐ સીં શિરસે સ્વાહા નમઃ । ૐ સૂં શિખાયૈ વષણ્ણમઃ । ૐ સૈં કવચાય હું નમઃ । ૐ સૌં નેત્રત્રયાય વષણ્ણમઃ । ૐ સઃ અસ્ત્રાયફ્ણ્ણમઃ ॥

અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ । ભક્ત્યાસમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥ ૧॥

૨) ૐ લં ઇન્દ્રાય સુરાધિપતયે નમઃ । ૐ રં અગ્નયે તેજોધિપતયે નમઃ । ૐ હં યમાય પ્રેતાધિપતયે નમઃ । ૐ ષં નિરૃતયે રક્ષોધિપતયે નમઃ । ૐ વં વરુણાય જલાધિપતયે નમઃ । ૐ યં વાયવે પ્રાણાધિપતયે નમઃ । ૐ સં સોમાય નક્ષત્રાધિપતયે નમઃ । ૐ શં ઈશાનાય વિદ્યાધિપતયે નમઃ । ૐ હ્રીં શેષાય નાગાધિપતયે નમઃ । ૐ આં બ્રહ્મણે લોકાધિપતયે નમઃ ॥ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ । ભક્ત્યાસમર્પયે તુભ્યં દ્વિતીયાવરણાર્ચનમ્ ॥ ૨॥

3) ૐ વજ્રાય નમઃ । ૐ શક્તયે નમઃ । ૐ દણ્ડાય નમઃ । ૐ ખડ્ગાય નમઃ । ૐ પાશાય નમઃ । ૐ અઙ્કુશાય નમઃ । ૐ ગદાયૈ નમઃ । ૐ ત્રિશૂલાય નમઃ । ૐ ચક્રાય નમઃ । ૐ પદ્માય નમઃ ॥ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ । ભક્ત્યાસમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥ ૩॥

ત્ર્યમ્બકાવરણમ્ ॥ અઙ્ગૈઃ પ્રથમાવૃતિઃ ॥ ૧॥ ઈશાનાયાર્કમૂર્તયે । મહાદેવાયેન્દુમૂર્તયે । ભવાય ક્ષિતિમૂર્તયે । શર્વાય જલમૂર્તયે । રુદ્રાયાગ્નિમૂર્તયે । ઉગ્રાય વાયુમૂર્તયે । ભીમાયાકાશમૂર્તયે । પશુપતયે યજમાનમૂર્તયે ॥ ૨ ॥ રમાયૈ । રાકાયૈ । પ્રભાયૈ । જ્યોત્સ્નાયૈ । પૂર્ણાયૈ । ઉષાયૈ । પૂરણ્યૈ । સુધાયૈ ॥ ૩ ॥ વિશ્વાયૈ । વિદ્યાયૈ । સિતાયૈ । પ્રહ્વાયૈ । સારાયૈ । સન્ધ્યાયૈ । શિવાયૈ । નિશાયૈ ॥ ૪ ॥ આર્યાયૈ । પ્રજ્ઞાયૈ । પ્રભાયૈ । મેધાયૈ । શાન્ત્યૈ । કાન્ત્યૈ । ધૃત્યૈ । મત્યૈ ॥ ૫ ॥ ધરાયૈ । માયાયૈ । અવન્યૈ । પદ્માયૈ । શાન્તાયૈ । અમોઘાયૈ । અજયાયૈ । અમલાયૈ ॥ ૬ ॥ ઇન્દ્રાદિભિઃ સપ્તમાવૃતિઃ ॥ ૭ ॥ વજ્રાદિભિરષ્ટમાવૃતિઃ ॥ ૮ ॥

મહામૃત્યુઞ્જયત્ર્યમ્બકરુદ્રાવરણમ્ ॥ ઈશાનાય । તત્પુરુષાય । અઘોરાય । વામદેવાય । સદ્યોજાતાય । નિવૃત્તિકલાયૈ । પ્રતિષ્ઠાકલાયૈ । વિદ્યાકલાયૈ । શાન્તિકલાયૈ । શાન્ત્યતીતકલાયૈ ॥ ૧॥ અઙ્ગૈર્દ્વિતીયા ॥ ૨ ॥ અષ્ટમૂર્તિભિસ્તૃતીયા ॥ ૩ ॥ રમાદ્યષ્ટભિશ્ચતુર્થી ॥ ૪ ॥ વિશ્વાદ્યષ્ટભિઃ પઞ્ચમી ॥ ૫ ॥ આર્યાદ્યષ્ટભિઃ ષષ્ઠી ॥ ૬ ॥ ધરાદ્યષ્ટભિસ્સપ્તમી ॥ ૭ ॥ અનન્તાય । સૂક્ષ્માય । શિવોત્તમાય । એકનેત્રાય । એકરુદ્રાય । ત્રિમૂર્તયે । શ્રીકણ્ઠાય । શિખણ્ડિને ॥ ૮ ॥ ઉમાયૈ । ચણ્ડેશ્વરાય । નન્દિને । મહાકાલાય । ગણેશાય । વૃષભાય । ભૃઙ્ગિરિટયે । સ્કન્દાય ॥ ૯ ॥ બ્રાહ્મ્યૈ । માહેશ્વર્યૈ । કૌમાર્યૈ । વૈષ્ણવ્યૈ । વારાહ્યૈ । ઇન્દ્રાણ્યૈ । ચામુણ્ડાયૈ । મહાલક્ષ્મ્યૈ ॥ ૧૦ ॥ ઇન્દ્રાદિભિઃ ॥ ૧૧ ॥ વજ્રાદ્યન્તે... વૃષભાય । ચણ્ડેશ્વરાય ॥ ૧૨ ॥ ઇતિ ॥

## ॥ અથ શ્રી મૃત્યુઞ્જય-અષ્ટોત્તરશતનામાવલિઃ ॥

ૐ ભગવતે નમઃ ।

ૐ સદાશિવાય નમઃ ।

ૐ સકલતત્ત્વાત્મકાય નમઃ ।

ૐ સર્વમન્ત્રરૂપાય નમઃ ।

ૐ સર્વયન્ત્રાધિષ્ઠિતાય નમઃ ।

ૐ તન્ત્રસ્વરૂપાય નમઃ ।

ૐ તત્ત્વવિદૂરાય નમઃ ।

ૐ બ્રહ્મરુદ્રાવતારિણે નમઃ ।

ૐ નીલકણ્ઠાય નમઃ ।

ૐ પાર્વતીપ્રિયાય નમઃ ।

ૐ સૌમ્યસૂર્યાગ્નિલોચનાય નમઃ ।

ॐ ભસ્મોદ્ધૂલિતવિગ્રહાય નમઃ ।

ॐ મહામણિમકુટધારણાય નમઃ ।

ॐ માણિક્યભૂષણાય નમઃ ।

ॐ સૃષ્ટિસ્થિતિપ્રલયકાલરૌદ્રાવતારાય નમઃ ।

ॐ દક્ષાધ્વરધ્વંસકાય નમઃ ।

ॐ મહાકાલભેદકાય નમઃ ।

ॐ મૂલાધારૈકનિલયાય નમઃ ।

ॐ તત્ત્વાતીતાય નમઃ ।

ॐ ગઙ્ગાધરાય નમઃ । ૨૦

ॐ સર્વદેવાધિદેવાય નમઃ ।

ॐ વેદાન્તસારાય નમઃ ।

ॐ ત્રિવર્ગસાધનાય નમઃ ।

ॐ અનેકકોટિબ્રહ્માણ્ડનાયકાય નમઃ ।

ॐ અનન્તાદિનાગકુલભૂષણાય નમઃ ।

ॐ પ્રણવસ્વરૂપાય નમઃ ।

ॐ ચિદાકાશાય નમઃ ।

ॐ આકાશાદિસ્વરૂપાય નમઃ ।

ॐ ગ્રહનક્ષત્રમાલિને નમઃ ।

ॐ સકલાય નમઃ ।

ॐ કલઙ્કરહિતાય નમઃ ।

ॐ સકલલોકૈકકર્ત્રે નમઃ ।

ॐ સકલલોકૈકભર્ત્રે નમઃ ।

ॐ સકલલોકૈકસંહર્ત્રે નમઃ ।

ॐ સકલનિગમગુહ્યાય નમઃ ।

ॐ સકલવેદાન્તપારગાય નમઃ ।

ॐ સકલલોકૈકવરપ્રદાય નમઃ ।

ॐ સકલલોકૈકશઙ્કરાય નમઃ ।

ॐ શશાઙ્કશેખરાય નમઃ ।

ॐ શાશ્વતનિજાવાસાય નમઃ । ૪૦

ॐ નિરાભાસાય નમઃ ।

ॐ નિરામયાય નમઃ ।

ॐ નિર્લોભાય નમઃ ।

ૐ નિર્મોહાય નમઃ ।

ૐ નિર્મદાય નમઃ ।

ૐ નિશ્ચિન્તાય નમઃ ।

ૐ નિરહઙ્કારાય નમઃ ।

ૐ નિરાકુલાય નમઃ ।

ૐ નિષ્કલઙ્કાય નમઃ ।

ૐ નિર્ગુણાય નમઃ ।

ૐ નિષ્કામાય નમઃ ।

ૐ નિરુપપ્લવાય નમઃ ।

ૐ નિરવદ્યાય નમઃ ।

ૐ નિરન્તરાય નમઃ ।

ૐ નિષ્કારણાય નમઃ ।

ૐ નિરાતઙ્કાય નમઃ ।

ૐ નિષ્પ્રપઞ્ચાય નમઃ ।

ૐ નિસ્સઙ્ગાય નમઃ ।

ૐ નિર્દ્વન્દ્વાય નમઃ ।

ૐ નિરાધારાય નમઃ । ૬૦

ૐ નિરોગાય નમઃ ।

ૐ નિષ્ક્રોધાય નમઃ ।

ૐ નિર્ગમાય નમઃ ।

ૐ નિર્ભયાય નમઃ ।

ૐ નિર્વિકલ્પાય નમઃ ।

ૐ નિર્ભેદાય નમઃ ।

ૐ નિષ્ક્રિયાય નમઃ ।

ૐ નિસ્તુલાય નમઃ ।

ૐ નિસ્સંશયાય નમઃ ।

ૐ નિરઞ્જનાય નમઃ ।

ૐ નિરૂપવિભવાય નમઃ ।

ૐ નિત્યશુદ્ધબુદ્ધપરિપૂર્ણાય નમઃ ।

ૐ નિત્યાય નમઃ ।

ૐ શુદ્ધાય નમઃ ।

ૐ બુદ્ધાય નમઃ ।

ૐ પરિપૂર્ણાય નમઃ ।

ૐ સચ્ચિદાનન્દાય નમઃ ।

ૐ અદૃશ્યાય નમઃ ।

ૐ પરમશાન્તસ્વરૂપાય નમઃ ।

ૐ તેજોરૂપાય નમઃ । ૮૦

ૐ તેજોમયાય નમઃ ।

ૐ મહારૌદ્રાય નમઃ ।

ૐ ભદ્રાવતારય નમઃ ।

ૐ મહાભૈરવાય નમઃ ।

ૐ કલ્પાન્તકાય નમઃ ।

ૐ કપાલમાલાધરાય નમઃ ।

ૐ ખટ્વાઙ્ગાય નમઃ ।

ૐ ખડ્ગપાશાઙ્કુશધરાય નમઃ ।

ૐ ડમરુત્રિશૂલચાપધરાય નમઃ ।

ૐ બાણગદાશક્તિબિન્દિપાલધરાય નમઃ ।

ૐ તૌમરમુસલમુદ્ગરધરાય નમઃ ।

ૐ સપરશુપરિઘધરાય નમઃ ।

ૐ ભુશુણ્ડીશતઘ્નીચક્રાદ્યયુધધરાય નમઃ ।

ૐ ભીષણકરસહસ્રમુખાય નમઃ ।

ૐ વિકટાટ્ટહાસવિસ્ફારિતાય નમઃ ।

ૐ બ્રહ્માણ્ડમણ્ડલાય નમઃ ।

ૐ નાગેન્દ્રકુણ્ડલાય નમઃ ।

ૐ નાગેન્દ્રહારાય નમઃ ।

ૐ નાગેન્દ્રવલયાય નમઃ ।

ૐ નાગેન્દ્રચર્મધરાય નમઃ । ૧૦૦

ૐ નાગેન્દ્રાભરણાય નમઃ ।

ૐ ત્ર્યમ્બકાય નમઃ ।

ૐ ત્રિપુરાન્તકાય નમઃ ।

ૐ વિરૂપાક્ષાય નમઃ ।

ૐ વિશ્વેશ્વરાય નમઃ ।

ૐ વિશ્વરૂપાય નમઃ ।

ૐ વિશ્વતોમુખાય નમઃ ।

ૐ મૃત્યુઞ્જયાય નમઃ । ૧૦૮

॥ ઇતિ શ્રી મૃત્યુઞ્જય-અષ્ટોત્તરશતનામાવલિઃ સમ્પૂર્ણા ॥

અથ દ્વાદશનામપૂજા ॥

ૐ મહાદેવાય નમઃ । ૐ મહેશ્વરાય નમઃ । ૐ શઙ્કરાય નમઃ । ૐ વૃષભધ્વજાય નમઃ । ૐ કૃત્તિવાસસે નમઃ । ૐ કામાઙ્ગનાશનાય નમઃ । ૐ દેવદેવેશાય નમઃ । ૐ શ્રીકણ્ઠાય નમઃ । ૐ હરાય નમઃ । ૐ પાર્વતીપતયે નમઃ । ૐ શ્રીરુદ્રાય નમઃ । ૐ શિવાય નમઃ ॥ ઇતિ ॥

વનસ્પતિરસોદ્ભૂતો ગન્ધાઢ્યો ગન્ધ ઉત્તમઃ । આઘ્રેયઃ સર્વદેવાનાં ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । ધૂપં સમર્પયામિ ॥

સુપ્રકાશો મહાદીપઃ સર્વતસ્તિમિરાપહઃ । સબાહ્યાભ્યન્તરજ્યોતિઃ દીપોઽયં પ્રતિગૃહ્યતામ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । દીપં સમર્પયામિ ॥

સત્પાત્રતદ્ધવિઃ સૌક્ષ્ય વિવિધાનેકભક્ષણમ્ । નિવેદયામિ દેવેશ સાનુગાય ગૃહાણ તત્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । નૈવેદ્યં સમર્પયામિ ॥

પૂગીફલસમાયુક્તં નાગવલ્લીદલૈર્યુતમ્ । ચૂર્ણં કર્પૂર સંયુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । તામ્બૂલં સમર્પયામિ ॥

હિરણ્યગર્ભગર્ભસ્થં હેમબીજં વિભાવસોઃ । અનન્તપુણ્યફલદમતઃ શાન્તિં પ્રયચ્છ મે ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । પૂજા સમ્પૂર્ણાર્થે હિરણ્યપુષ્પદક્ષિણાં સમર્પયામિ ॥

કોટિસૂર્યપ્રતીકાશ નીરાજનમુમાપતે । ગૃહાણ દેવદેવેશ પ્રીત્યા દત્તં સદાશિવ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । મહાનીરાજનં સમર્પયામિ ॥

પુષ્પાઞ્જલિં પ્રયચ્છામિ દેવદેવ મહેશ્વર । તુલસીબિલ્વમન્દાર કલ્હારસરસીરુહૈઃ ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । મન્ત્રપુષ્પં સમર્પયામિ ॥

પ્રદક્ષિણં કરોમિ ત્વાં પાહિ માં મૃડ શઙ્કર । અનાથનાથ સર્વજ્ઞ ભક્તાનાં ભદ્રદાયક ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । પ્રદક્ષિણં સમર્પયામિ ॥

પ્રણમામિ જગન્નાથ પ્રણતાર્તિપ્રણાશન । પ્રણામગોચરેશાન સદાશિવ જગત્પતે ॥ શ્રી મૃત્યુઞ્જયરુદ્રાય નમઃ । નમસ્કારાન્ સમર્પયામિ ॥

ૐ નમઃ શિવાય સામ્બાય બ્રહ્મણે લિઙ્ગમૂર્તયે । પ્રસન્નાર્ઘ્યં મયા દત્તં પ્રસન્નો ભવ શઙ્કર ॥ શ્રીમૃત્યુઞ્જયાય નમઃ । ઇદમર્ઘ્યમ્ ॥ ઇતિ ત્રિવારં બિલ્વપત્રાક્ષતપુષપુષ્પગન્ધક્ષીરદ્રવ્યૈરર્ઘ્યં દદ્યાત્ । પુનઃ રુદ્રગાયત્ર્યા જલેન ત્રિવારં દત્વા, પ્રાર્થયતિ । યથા “ઋણરોગાધિદારિદ્ર્યપાપક્ષુદપમૃત્યવઃ । ભયશોકમનસ્તાપાઃ નશ્યન્તુ મમ સર્વદા” ॥ ઇતિ ॥ તથા ચ કલશં મૃત્યુસૂક્તેન શતરુદ્રીયાનુવાકેન ચાભિમન્ત્રયતિ ।

અથ પ્રાર્થના ॥

મૃત્યુઞ્જયમહાદેવ પાહિ માં શરણાગતમ્ ।
જન્મમૃત્યુજરારોગૈઃ પીડિતં કર્મબન્ધનૈઃ ॥ ૧॥

પ્રસીદ મે મહાદેવ સંસારાર્તસ્ય ખિદ્યતઃ ।
સર્વપાપક્ષયં કૃત્વા રક્ષ માં પરમેશ્વર ॥ ૨॥

મહાદારિદ્ર્યમગ્નસ્ય મહાપાપહતૌજસઃ ।
મહાશોકવિનષ્ટસ્ય મહારોગાતુરસ્ય ચ ॥ ૩॥

ઋણભારપરીતસ્ય દહ્યમાનસ્ય કર્મભિઃ ।
ગ્રહૈઃ પ્રપીડ્યમાનસ્ય પ્રસીદ મમ શઙ્કર ॥ ૪॥

નમસ્તે દેવ દેવેશ શમ્ભો સર્વાર્થસાધક ।
અભીષ્ટં મમ દેહિ ત્વં સર્વાભીષ્ટફલપ્રદ ॥ ૫॥

ઋણપાતકદૌર્ભાગ્યદારિદ્ર્યવિનિવૃત્તયે ।
અશેષાઘવિનાશાય પ્રસીદ મમ શઙ્કર ॥ ૬॥

દીર્ઘમાયુઃ સદારોગ્યં કોશવૃદ્ધિર્બલોન્નતિઃ ।
મમાસ્તુ નિત્યમાનન્દઃ પ્રસાદાત્તવ શઙ્કર ॥ ૭॥

બદ્ધોઽહં વિવિધૈઃ પાશૈઃ સંસારભયબન્ધનૈઃ ।
પતિતં મોહજાલે માં ત્વં સમુધ્ધર શઙ્કર ॥ ૮॥

સંસારે જનિતાપરોગસહિતે તાપત્રયાક્રન્દિતે
    નિત્યં પુત્રકલત્રવિત્તવિલસત્પાશૈર્નિબદ્ધં દૃઢમ્ ।
ગર્વાન્ધં બહુપાપવર્ગસહિતં કારુણ્યદૃષ્ટ્યા વિભો
    શ્રીમૃત્યુઞ્જય પાર્વતીપ્રિય સદા માં પાહિ સર્વેશ્વર ॥ ૯॥

પ્રસીદભગવન્ મહ્યં અજ્ઞાનાત્કુણ્ઠિતાત્મને ।
પ્રીણાતુ ભગવન્ દેવઃ કર્મણાનેન શાશ્વતઃ ॥ ઇતિ કલશસ્થાપનમ્ ॥

અથ અન્વાધાનમ્ ॥

મૃત્યુઞ્જયહોમઃ કર્મ ॥। બલવર્ધનો નામાગ્નિઃ, મૃત્યુઞ્જયરુદ્રો દેવતા, ચરુર્હવિઃ । ઉપહોમે, મૃત્યુઞ્જયરુદ્રમન્ત્રેણ
૧. દુગ્ધાજ્યાપ્લુત-અમૃતાસમિદ્ભિસ્ત્રિસહસ્રસઙ્ખ્યાકાહુતિભિઃ, (આયુષે)

૨. અમૃતાવટતિલદૂર્વાઃ પયો ઘૃતં પાયસમિતિ ક્રમેણ સપ્તદ્રવૈઃ ॥ પ્રતિદ્રવ્યં સહસ્રસઙ્ખ્યાકાહુતિભિઃ, (તીવ્રે જ્વરે ઘોરતરેઽભિચારે સોન્માદકે દાહગદે ચ મોહે ।)

॥ અથ સપ્તદ્રવ્યપ્રાર્થના ॥

I. શ્વેતવર્ણ સાત્વિકાઙ્ગ બાલાદિત્ય સમપ્રભ । સુધાહુતિં પ્રદાસ્યામિ પ્રસન્નો ભવ શઙ્કર ॥

II. પીતવર્ણ બાલ્યદેહ વ્યાલયજ્ઞોપવીતક । વટાહુતિં પ્રદાસ્યામિ પ્રસન્નો ભવ શઙ્કર ॥

III. કૃષ્ણવર્ણ મહાકાય દશબાહો ત્રિલોચન । તિલાહુતિં પ્રદાસ્યામિ પ્રસન્નો ભવ શઙ્કર ॥

IV. પાણ્ડુવર્ણ મહાકાય પૌગણ્ડ રાજસ દ્યુતે । દૂર્વાહુતિં પ્રદાસ્યામિ પ્રસન્નો ભવ શઙ્કર ॥

V. શઙ્ખવર્ણ પઞ્ચવક્ત્ર નાગાભરણ ભૂષિત । ક્ષીરાહુતિં પ્રદાસ્યામિ પ્રસન્નો ભવ શઙ્કર ॥

VI. રક્તવર્ણ મહારૌદ્ર રમાનાથ પ્રપૂજિત । ઘૃતાહુતિં પ્રદાસ્યામિ પ્રસન્નો ભવ શઙ્કર ॥

VII. ધૂમ્રવર્ણ મહાકાય સજર તામ્રલોચન । પાયસં તુ પ્રદાસ્યામિ પ્રસન્નો ભવ શઙ્કર ॥

૩. દુગ્ધસિક્તચતુરઙ્ગુલામૃતાકાણ્ડૈર્દ્વાદશસહસ્રસઙ્ખ્યાકાહુતિભિઃ, (આરોગ્યાયુષે ચ લક્ષ્મ્યૈ ચ)
૪. અમૃતાવટતિલદૂર્વાપયઃપાયસાજ્યૈઃ પ્રતિદ્રવ્યં શતસઙ્ખ્યાકાહુતિભિઃ, (દીર્ઘાયુષે)
૫. અમૃતાવટતિલદૂર્વાપયઃપાયસાજ્યૈઃ ચતુશ્ચત્વારિંશદુત્તરશતાવૃત્યા અષ્ટોત્તર સહસ્રસઙ્ખ્યાકાહુતિભિઃ, (આયુષે)
૬. સિતસિદ્ધાર્થૈસ્સહસ્રસઙ્ખ્યાકાહુતિભિઃ, (જ્વરજોપદ્રવશાન્ત્યૈ)
૭. અપામાર્ગસમિદ્ભિઃ સહસ્રસઙ્ખ્યાકાહુતિભિઃ, (આરોગ્યાપ્ત્યૈ)
૮. બિલ્વસમિદ્ભિરયુત૧૦સઙ્ખ્યાકાહુતિભિઃ, (સમ્પત્પ્રાપ્ત્યૈ)
૯. પાલાશસમિદ્ભિરયુતસઙ્ખ્યાકાહુતિભિઃ, (બ્રહ્મવર્ચસે)
૧૦. વટસમિદ્ભિરયુતસઙ્ખ્યાકાહુતિભિઃ, (ધનપ્રાપ્ત્યૈ)
૧૧. ખદિરસમિદ્ભિરયુતસઙ્ખ્યાકાહુતિભિઃ, (કાન્ત્યૈ)
૧૨. તિલદ્રવ્યૈરયુતસઙ્ખ્યાકાહુતિભિઃ, (દુરિતશાન્ત્યૈ)
૧૩. ક્ષીરપરમાન્નાભ્યાં અયુતસઙ્ખ્યાકાહુતિભિઃ, (સર્વશાન્ત્યૈ)
૧૪. દૂર્વાભિરયુતસઙ્ખ્યાકાહુતિભિઃ, (વ્યાધિનિવૃત્યૈ)
૧૫. ત્રિમધુરાપ્લુતપાયસેનાયુતસઙ્ખ્યાકાહુતિભિઃ, (સમ્પદારોગ્યકીર્ત્યૈ)
૧૬. બિલ્વપલાશખદિરવટસમિત્તિલસર્ષપક્ષીરપાયસદધિદૂર્વાખ્યૈર્દશદ્રવ્યૈઃ પ્રતિદ્રવં શતાવૃત્યા સહસ્રસઙ્ખ્યાકાહુતિભિઃ, (સર્વામયોપદ્રવશાન્ત્યૈ આયુરભિવૃદ્ધયે ચ)

પીઠાવરણમન્ત્રૈરાજ્યેન મન્ત્રસઙ્ખ્યયા બ્રહ્માર્પણ મન્ત્રેણાજ્યેનાષ્ટવારં યક્ષ્યે ॥ અગ્નિઃ સ્વિષ્ટકૃત્ .. .. ।

॥ ઇતિ મૃત્યુઞ્જયારાધનમ્ ॥

સઙ્ગ્રાહકઃ પ. પુ. પરમેશ્વર-પુટ્ટન્મને

## ॥ માર્કણ્ડેયપ્રોક્તમૃત્યુશમનમૃત્યુઞ્જયસ્તોત્રમ્ ॥

રુદ્રં પશુપતિં સ્થાણું નીલકણ્ઠમુમાપતિમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧॥

નીલકણ્ઠં વિરૂપાક્ષં નિર્મલં નિરુપદ્રવમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૨॥

કાલકણ્ઠં કાલમૂર્તિં કાલાગ્નિં કાલનાશનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૩॥

દેવદેવં મહાદેવં દેવેશં વૃષભધ્વજમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૪॥

વામદેવં મહાદેવં લોકનાથં જગદ્ગુરુમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૫॥

અનન્તમવ્યયં શાન્તમક્ષમાલાધરં હરમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૬॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગં ત્રિપુણ્ડ્રાઙ્કિતમસ્તકમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૭॥

સ્વર્ગાપવર્ગદાતારં સૃષ્ટિસ્થિત્યન્તકારણમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૮॥

આનન્દં પરમં નિત્યં કૈવલ્યપદકારણમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૯॥

ત્રિણેત્રં પઞ્ચવક્ત્રં ચ શઙ્કરં શૂલપાણિનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૦॥

માર્કણ્ડેયકૃતં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ ।
તસ્ય મૃત્યુભયં નાસ્તિ સત્યં સત્યં વદામ્યહમ્ ॥ ૧૧॥

ઇતિ મૃત્યુશમનમૃત્યુઞ્જયસ્તોત્રં સમ્પૂર્ણમ્ ॥

## ॥ મૃત્યુઞ્જયસ્તોત્રં નરસિંહપુરાણે ॥

માર્કણ્ડેય ઉવાચ -

નારાયણં સહસ્રાક્ષં પદ્મનાભં પુરાતનમ્ ।
પ્રણતોઽસ્મિ હૃષીકેશં કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૧॥

ગોવિન્દં પુણ્ડરીકાક્ષમનન્તમજમવ્યયમ્ ।
કેશવં ચ પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૨॥

વાસુદેવં જગદ્યોનિં ભાનુવર્ણમતીન્દ્રિયમ્ ।
દામોદરં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૩॥

શઙ્ખચક્રધરં દેવં છન્નરૂપિણમવ્યયમ્ ।
અધોક્ષજં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૪॥

વારાહં વામનં વિષ્ણું નરસિંહં જનાર્દનમ્ ।
માધવં ચ પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૫॥

પુરુષં પુષ્કરં પુણ્યં ક્ષેમબીજં જગત્પતિમ્ ।
લોકનાથં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬॥

ભૂતાત્માનં મહાત્માનં જગદ્યોનિમયોનિજમ્ ।
વિશ્વરૂપં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૭॥

સહસ્રશિરસં દેવં વ્યક્તાવ્યક્તં સનાતનમ્ ।
મહાયોગં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૮॥

ઇત્યુદીરિતમાકર્ણ્ય સ્તોત્રં તસ્ય મહાત્મનઃ ।
અપયાતસ્તતો મૃત્યુર્વિષ્ણુદૂતૈશ્ચ પીડિતઃ ॥ ૯॥

ઇતિ તેન જિતો મૃત્યુર્માર્કણ્ડેયેન ધીમતા ।
પ્રસન્ને પુણ્ડરીકાક્ષે નૃસિંહે નાસ્તિ દુર્લભમ્ ॥ ૧૦॥

મૃત્યુઞ્જયમિદં પુણ્યં મૃત્યુપ્રશમનં શુભમ્ ।
માર્કણ્ડેયહિતાર્થાય સ્વયં વિષ્ણુરુવાચ હ ॥ ૧૧॥

ય ઇદં પઠતે ભક્ત્યા ત્રિકાલં નિયતઃ શુચિઃ ।
નાકાલે તસ્ય મૃત્યુઃ સ્યાન્નરસ્યાચ્યુતચેતસઃ ॥ ૧૨॥

હૃત્પદ્મમધ્યે પુરુષં પુરાણં નારાયણં શાશ્વતમાદિદેવમ્ ।
સઞ્ચિન્ત્ય સૂર્યાદપિ રાજમાનં મૃત્યું સ યોગી જિતવાંસ્તદૈવ ॥ ૧૩॥

ઇતિ શ્રીનરસિંહપુરાણે માર્કણ્ડેયમૃત્યુઞ્જયો નામ સપ્તમોઽધ્યાયઃ ॥

## ॥ અથ શિવસ્તુતિઃ ॥

ધરાપોગ્નિર્મરુદ્વ્યોમ મખેશેન્દ્વર્કમૂર્તયે ।
સર્વ ભૂતાન્તરસ્થાય શઙ્કરાય નમો નમઃ ॥ ૧॥

શ્રુત્યન્તકૃતવાસાય શ્રુતયે શ્રુતિજન્મને ।
અતીન્દ્રિયાય મહતે શાશ્વતાય નમો નમઃ ॥ ૨॥

સ્થૂલસૂક્ષ્મવિભાગાભ્યાં અનિર્દેશ્યાય શમ્ભવે ।
ભવાય ભવસમ્ભૂત દુઃખહન્ત્રે નમોઽસ્તુતે ॥ ૩॥

તર્કમાર્ગાતિદૂરાય તપસાં ફલદાયિને ।
ચતુર્વર્ગવદન્યાય સર્વજ્ઞાય નમો નમઃ ॥ ૪॥

આદિમધ્યાન્તશૂન્યાય નિરસ્તાશેષભીતયે ।
યોગિધ્યેયાય મહતે નિર્ગુણાય નમો નમઃ ॥ ૫॥

વિશ્વાત્મને વિચિન્ત્યાય વિલસચ્ચન્દ્રમૌલિને ।
કન્દર્પદર્પકાલાય કાલહન્ત્રે નમો નમઃ ॥ ૬॥

વિષાશનાય વિહરદ્ વૃષસ્કન્દમુપેયુષે ।
સરિદ્ધામસમાબધ્દ કન્દર્પાય નમો નમઃ ॥ ૭॥

શુધ્દાય શુધ્દભાવાય શુધ્દાનામન્તરાત્મને ।
પુરાન્તકાય પૂર્ણાય પુણ્યનામ્ને નમો નમઃ ॥ ૮॥

ભક્તાય નિજભક્તાનાં ભુક્તિમુક્તિપ્રદાયિને ।
વિવાસસે વિવાસાય વિશ્વેશાય નમો નમઃ ॥ ૯॥

ત્રિમૂર્તિમૂલભૂતાય ત્રિણેત્રાય નમો નમઃ ।
ત્રિધામ્નાં ધામરૂપાય જન્મઘ્નાય નમો નમઃ ॥ ૧૦॥

દેવાસુરશિરોરત્ન કિરણારુણિતાઙ્ઘ્રયે ।
કાન્તાય નિજકાન્તાયૈ દત્તાર્ધાયૈ નમો નમઃ ॥ ૧૧॥

સ્તોત્રેણાનેન પૂજાયાં પ્રીણયેજ્જગતઃ પતિમ્ ।
ભુક્તિમુક્તિપ્રદં ભક્ત્યા સર્વજ્ઞં પરમેશ્વરમ્ ॥ ૧૨॥

ઇતિ શિવસ્તુતિઃ ॥

## ॥ અથ શ્રીશિવમાનસપૂજા ॥

રત્નૈઃ કલ્પિતમાસનં હિમજલૈઃ સ્નાનં ચ દિવ્યામ્બરં
નાનારત્નવિભૂષિતં મૃગમદામોદાઙ્કિતં ચન્દનમ્ ।
જાતીચમ્પકબિલ્વપત્રરચિતં પુષ્પં ચ ધૂપં તથા
દીપં દેવ દયાનિધે પશુપતે હૃત્કલ્પિતં ગૃહ્યતામ્ ॥ ૧॥

સૌવર્ણે નવરત્નખણ્ડરચિતે પાત્રે ઘૃતં પાયસં
ભક્ષ્યં પઞ્ચવિધં પયોદધિયુતં રમ્ભાફલં પાનકમ્ ।
શાકાનામયુતં જલં રુચિકરં કર્પૂરખણ્ડોજ્જ્વલં
તામ્બૂલં મનસા મયા વિરચિતં ભક્ત્યા પ્રભો સ્વીકુરુ ॥ ૨॥

છત્રં ચામરયોર્યુગં વ્યજનકં ચાદર્શકં નિર્મલં
વીણાભેરિમૃદઙ્ગકાહલકલા ગીતં ચ નૃત્યં તથા ।
સાષ્ટાઙ્ગં પ્રણતિઃ સ્તુતિર્બહુવિધા હ્યેતત્સમસ્તં મયા
સઙ્કલ્પેન સમર્પિતં તવ વિભો પૂજાં ગૃહાણ પ્રભો ॥ ૩॥

આત્મા ત્વં ગિરિજા મતિઃ સહચરાઃ પ્રાણાઃ શરીરં ગૃહં
પૂજા તે વિષયોપભોગરચના નિદ્રા સમાધિસ્થિતિઃ ।
સઞ્ચારઃ પદયોઃ પ્રદક્ષિણવિધિઃ સ્તોત્રાણિ સર્વા ગિરો
યદ્યત્કર્મ કરોમિ તત્તદખિલં શમ્ભો તવારાધનમ્ ॥ ૪॥

કરચરણ કૃતં વાક્કાયજં કર્મજં વા
શ્રવણનયનજં વા માનસં વાપરાધમ્ ।
વિહિતમવિહિતં વા સર્વમેતત્ક્ષમસ્વ
જય જય કરુણાબ્ધે શ્રીમહાદેવશમ્ભો ॥ ૫॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતા શિવમાનસપૂજા સમાપ્તા ॥

સઙ્ગ્રાહકઃ પ. પુ. પરમેશ્વર-પુટ્ટન્મને

Encoded and proofread by Parameshwar Puttanmane poornapathi at gmail.com

*Mrityunjaya Aradhanam*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*